अयि तरुणि! अनेन आवरण कर्मणा त्वं गायत्री सावित्री सरस्वती व सुभगा भूत्वा सुरक्षिता भव ॥
ayi taruṇi! anena āvaraṇa karmaṇā tvaṁ gāyatrī sāvitrī sarasvatī va subhagā bhūtvā surakṣitā bhava ||

सर्व मंगल मांगल्ये शिवे सर्वार्थ शादिके । शरण्ये त्रयंबके गौरि नारायणी नमोऽस्तु ते ॥
sarva maṅgala māṅgalye śive sarvārtha śādike |
śaraṇye trayambake gauri nārāyaṇī namo'stu te ||

### Commitment to the Groom

- The Bride's father takes a tray with fruit, coconut, rice etc and offering it to the parents of the groom recites the following:—

ॐ अद्य ____data's____ गोत्र उत्पन्नो _____dātā______ नाम अहम्; ____groom's__ गोत्र उत्पन्नाय ____(name of the groom's father)____ आर्यस्य पुत्राय ____(name of the groom)____ नाम विष्णु स्वरूपिणे वधु अर्थिने वराय, मम पुत्रीं ____(name of the bride)____ नाम्नीं श्री रूपिनीं वर अर्थिनीम् इमां सुतां ज्योतिर्विदिष्टे सुनिश्चित मुहूर्ते तुभ्यं दास्ये।

oṁ adya ___*dātā's*__ gotra utpanno ____*dātā*_____ nāma aham;
____*groom's*____ gotra utpannāya ___(*name of the groom's father*)___ āryasya putrāya

___(*name of the groom*)___ nāma viṣṇu svarūpiṇe vadhu arthine varāya, mama putrīṁ ___(*name of the bride*)___ nāmnīṁ śrī rūpinīṁ vara arthinīm imāṁ sutāṁ jyotir vādiṣṭe suniścita muhūrte tubhyaṁ dāsye.

*(I ................ of the clan of ................. promise to bestow my daughter named ..................who is desirous of a husband, upon your son named .................... , who is desirous of a wife, at the auspicious time that will be chosen.)*

### Giving the pledge.

❖ The Father of the Bride says:—

वाच्च दत्त मया सुता पुत्र अर्थं स्विकृत त्वया । सुतां अवलोकन विधौ निश्चित्तस्त्वं सुखी भव ॥

vācca data mayā sutā putra arthaṁ svikṛta tvayā |
sutāṁ avalokana vidhau niścittas tvaṁ sukhī bhava ||

*I hereby pledge to bestow my daughter whom you have seen and accepted upon your son, may you both remain happy and firm in your resolve.*

❖ The father of the Groom says:—

वाच्च दत्त त्वया सुता पुत्र अर्थं स्विकृत मया । वर अवलोकन विधौ निश्चित्तस्त्वं सुखी भव ॥

vācca data tvayā sutā putra arthaṁ svikṛta mayā |
vara avalokana vidhau niścittas tvaṁ sukhī bhava ||

*I hereby pledge to accept you daughter for my son whom you have seen and accepted, may you both remain happy and firm in your resolve.*

## Conditions of Agreement

जन्म-प्रभृति इयं सुता आत्मवत् पालिता मया । त्वत् पुत्राय प्रदास्यामि स्नेहेण परिपालयताम् ॥

janma-prabhṛti iyaṁ sutā ātmavat pālitā mayā |
tvat putrāya pradāsyāmi snehena paripālayatām ||

*For more than eighteen years have I raised this child as my very self, I shall bestow her upon your son; may you take care of her with great affection.*

व्यंग क्लीबः पंक्ति-हीन त्रिर्विद्यो व्यसनि ऋणि । तावात्तव सुतो न स्यात् सुतां दास्यामि निश्चयात् ॥

vyaṅga klībaḥ paṅkti-hīna trir-vidyo vyasani ṛṇi |
tāvāt tava suto na syāt sutāṁ dāsyāmi niścayāt ||

*As long as your son remains whole in body and mind; does not become impotent; commit a crime, fall into vice or debt; I shall bestow my daughter in marriage, at the auspicious time that has been agreed upon.*

❖ The bestower gives the fruit etc to the father of the groom as he says:—

दास्यामि! दास्यामि! दास्यामि! dāsyāmi! dāsyāmi! dāsyāmi! (I will give)

Groom's father;

ॐ स्वस्ति! ॐ स्वस्ति! ॐ स्वस्ति! oṁ svasti! oṁ svasti! oṁ svasti! (May it be well)

❖ The lagna Patrika can be read at this time.

## Viśva-kalyāna Prārthana

द्यौः शांतिरंतरिक्षगुं शांतिः पृथिवी शांतिराप शांतिरोषधय शांतिः । वनस्पतय शांतिः विश्वेदेवाः शांतिर्ब्रह्म शांतिः सर्वगुं शांतिः शांतिरेव शांतिः सा मा शांतिरेधि ॥

Dyauḥ śāntir antarikṣagum śāntiḥ pṛthivī śāntir āpa śāntir oṣadhaya śāntiḥ | vanaspataya śāntir viśvedevāḥ śāntir brahma śāntiḥ sarvagum śāntiḥ śāntir eva śāntiḥ sā mā śāntir edhi ||

*To the Sky be peace, to the atmosphere peace, to the Earth peace, to the waters and Plants be peace. To the Trees peace, to the All-Gods peace, peace to Brahma peace, may the entire Universe have peace, peace indeed peace—may I too experience that peace!*

❖ Sets of clothes and gifts are exchanged to ratify the agreement.

दानं विभूषणं नित्यं दानं दुर्गति वारणम् । दानं स्वर्गस्य सोपानं दानं शक्ति-करं शिवम् ॥

dānaṁ vibhūṣaṇaṁ nityaṁ dānaṁ durgati vāraṇam |
dānaṁ svargasya sopānaṁ dānaṁ śakti-karaṁ śivam ||

*Generosity is an ornament, liberality wards off the evil course.*
*liberality is the stairway to heaven, liberality creates energy and is auspicious.*

दानेन अरातिरपानुदन्त दानेन द्विशन्तो मित्रा भवन्ति । तद्दानस्य फलं जातं वरदं परमं हुतम् ॥

dānena arātir apānudanta dānena dviśanto mitrā bhavanti |
tad dānasya phalaṁ jātaṁ varadaṁ paramaṁ hutam ||

*From liberality all difficulties are overcome and enemies become friends.*
*That has become the result of liberality, granting boons, the best of all offerings.*

धनमग्निर्धनं वायुर्धनं सूर्यो धनं वसुः । धनमिन्द्रो बृहस्पतिः वरुणं धनं अस्तु ते ॥

dhanam agnir dhanaṁ vāyur dhanaṁ sūryo dhanaṁ vasuḥ |
dhanam indro bṛhaspatiḥ varuṇaṁ dhanaṁ astu te ||

*Wealth is fire, wind, sun and prosperity; Wealth is Indra, Brihapasti and Varuna, may abundant wealth be yours.*

❖ The couple retire to dress.
❖ They return and prostrate to each other.
❖ Sumangalis come and bless the couple.
❖ Asirvadam

# Paurānika Āśirvādam

श्री महद्भ्यो नमः ! śrī mahadbhyo namaḥ ! *Salutations to you great people.*

स्वस्ति मन्त्रार्थाः सत्याः सफलाः सन्तु इति भवन्तो महान्तोऽनुगृह्णन्तु ॥ १ ॥
svasti mantrārthāḥ satyāḥ saphalāḥ santu iti bhavanto mahānto'nugṛhṇantu || 1 ||

*May all of you, the great people, be kind to me so that the meanings of the mantras for auspiciousness may be true and successful.*

अस्य मुहूर्तः सुमुहूर्तो भूयाद् इति भवन्तो महान्तो अनुगृह्णन्तु ॥ २ ॥
asya muhūrtaḥ sumuhūrto bhūyād iti bhavanto mahānto anugṛhṇantu || 2 ||

*May all of you great people be gracious to me, affirm that this moment is an auspicious one.*

तल्लग्न अपेक्षया आदित्यादि नवानां ग्रहाणां आनुकूल्यं भूयादिति भवन्तो महान्तो अनुगृह्णन्तु ॥ ३ ॥
tallagna apekṣayā ādityādi navānāṁ grahāṇāṁ ānukūlyaṁ bhūyād iti bhavanto mahānto anugṛhṇantu || 3 ||

*O great people, please be kind to me so that the sun and the nine planets, will be favorable to me in relation to the ascendant sign.*

ये ये ग्रहाः शुभेतर-स्थानेषु स्थिताः, तेषां ग्रहाणां शुभ स्थान फल अवाप्तिर्-अस्विति, भूयादिति भवन्तो महान्तो अनुगृह्णन्तु ॥ ४ ॥
ye ye grahāś śubhetara-sthāneṣu sthitāḥ, teṣāṁ grahāṇāṁ śubha sthāna phala avāptir-asviti, bhūyād iti bhavanto mahānto anugṛhṇantu || 4 ||

*O great people, please be gracious to me, so that all the planets which are situated in inauspicious positions may produce the fruits of the auspicious positions.*

ये ये ग्रहाः शुभ-स्थानेषु स्थिताः, तेषां ग्रहाणाम् अतिशयेन एकादश शुभ स्थान फल अवाप्तिरस्विति भूयादिति भवन्तो महान्तो अनुगृह्णन्तु ॥ ५ ॥

ye ye grahāḥ śubha-sthāneṣu sthitāḥ, teṣāṁ grahāṇām atiśayena ekādaśa śubha sthāna phala avāptirasviti bhūyād iti bhavanto mahānto anugṛhṇantu || 5 ||

*O great people, be merciful to me, may all the planets situated in auspicious positions produce the fruits of most auspicious position of the eleventh house.*

अनयोः दम्पत्योः वेदोक्तं दीर्घं आयुष्यं भूयादिति भवन्तो महान्तो अनुगृह्णन्तु ॥ ६ ॥
anayoḥ dampatyoḥ vedoktaṁ dīrghaṁ āyuṣyaṁ bhūyād iti bhavanto mahānto anugṛhṇantu || 6 ||

*O great people, please be kind to this couple so that they may have a long life as described in the Vedas.*

अनयोः दम्पत्योः गृहे वसतां द्विपदां चतुष्पदां नीरोग शतायुषं भूयादिति भवन्तो महान्तो अनुगृह्णन्तु ॥ ७
anayoḥ dampatyoḥ gṛhe vasatāṁ dvipadāṁ catuṣpadāṁ nīroga śatāyuṣaṁ bhūyāditi bhavanto mahānto anugṛhṇantu || 7 ||

*O great people, please bless this couple, and those who live in the house of this couple – including birds and beasts so that they may all live a hundred years of health.*

अनयोः दम्पत्योः क्षेम स्थैर्य धैर्य सौर्य वीर्य विजय आयुर् आरोग्य ऐश्वर्य अभिवृद्धिः भूयादिति भवन्तो महान्तो अनुगृह्णन्तु ॥ ८ ॥

anayoḥ dampatyoḥ kṣema sthairya dhairya saurya vīrya vijaya āyur ārogya aiśvarya abhivṛddhiḥ bhūyād iti bhavanto mahānto anugṛhṇantu || 8 ||

*May all of you great people, bless this couple with peace, stability, patience, valour, prowess, victory, longevity, health, wealth and prosperity.*

अनयोः दम्पत्योः सर्वेषां देवतानां प्रसादेन च हितोक्त महत् ऐश्वर्य आवाप्तिः आचन्द्रार्कं वंशा वृद्धि भूयादिति भवन्तो महान्तो अनुगृह्णन्तु ।। ९ ।।

anayoḥ dampatyoḥ sarveṣāṁ devatānāṁ prasādena ca hitokta mahat aiśvarya āvāptiḥ ācandrārkaṁ vaṁśā vṛddhi bhūyād iti bhavanto mahānto anugṛhṇantu || 9 ||

*O great people, please be kind to this couple by the grace of all the gods, so that they may obtain great opulence, as long as the moon and the sun exist may their descendants increase.*

अनयोः दम्पत्योः आयुर् बलं यशो वर्चः पशवः स्थैर्यं सिद्धिर् लक्ष्मीः क्षमा कान्तिस् सद्गुणा आनन्दो नित्योत्सवो नित्य-श्री नित्य-मङ्गलं इत्येषां सर्वदा अभिवृद्धिर् भूयादिति भवन्तो महान्तो अनुगृह्णन्तु ।।

anayoḥ dampatyoḥ āyur balaṁ yaśo varcaḥ paśavaḥ sthairyaṁ siddhir lakṣmīḥ kṣamā kāntis sadguṇā ānando nityotsavo nitya-śrī nitya-maṅgalaṁ ityeṣāṁ sarvadā abhivṛddhir bhūyād iti bhavanto mahānto anugṛhṇantu || 10 ||

*May you, the greatest of all, bless this couple with longevity, strength, fame, splendour, stock, stability, perfection, opulence, forgiveness, radiance, good qualities, happiness, eternal celebration, eternal opulence and eternal auspiciousness.*

अनयोः दम्पत्योः गृहे धन लक्ष्मी धान्य लक्ष्मी सन्तान लक्ष्मी सौम्य लक्ष्मी सौभाग्य लक्ष्मी, गज लक्ष्मी मोक्ष लक्ष्मी अष्ठ लक्ष्म्याः स्थिरतर सिद्धिः भूयादिति भवन्तो महान्तो अनुगृह्णन्तु ।। ११ ।।

anayoḥ dampatyoḥ gṛhe dhana lakṣmī dhānya lakṣmī santāna lakṣmī saumya lakṣmī saubhāgya lakṣmī, gaja lakṣmī mokṣa lakṣmī aṣṭha lakṣmyāḥ sthiratara siddhiḥ bhūyād iti bhavanto mahānto anugṛhṇantu || 11 ||

*May you, the great ones, bless this couple so that their house may be graced with wealth, opulence, grain, children, gentleness, fortune, vehicles, liberation, eight opulences and more stable perfection.*

सर्वे जनाः नीरोगाः निरुपद्रवाः सदाचार-सम्पन्न आढ्या निर्मत्सर दयालवश्च भूयासुरिति भवन्तो महान्तो अनुगृह्णन्तु ।। १२ ।।

sarve janāḥ nīrogāḥ nir-upadravāḥ sad-ācāra-sampanna āḍhyā nir-matsara dayālavaśca bhūyāsur iti bhavanto mahānto anugṛhṇantu || 12 ||

*May everyone be healthy, free from trouble, endowed with good conduct, wealthy, free from envy and compassionate. Please bless them.*

देशोऽयं निरुपद्रवो अस्तु । सर्वे जनाः सुखिनो भवन्तु ।। १३ ।।

deśo ayaṁ nir-upadravo astu | sarve janāḥ sukhino bhavantu || 13 ||

*Let this country be free from troubles. May all people be happy.*

समस्त सन्मङ्गलानि सन्तु । उत्तरोत्तर अभिवृद्धिः अस्तु ।। १४ ।।

samasta sanmaṅgalāni santu | uttarottara abhivṛddhiḥ astu || 14 ||

*May all be well. May progress advance steadily.*

- Vighneśvara udvāsanam
- graha prīti dānam
- ācārya sambhāvana

# VARA VṚTI KARMA
## Inviting the Groom
## (Tilak, Tika, Phaladāna)

❖ The bride's party goes to the groom's house and formally invites him.

**Saṅkalpaḥ** – हरिः ॐ तत्सत् ……… अस्यां शुभ तिथौ ____groom's___ गोत्रोत्पन्नः ____groom___ शर्मणः ____bride's___ गोत्रोत्पन्नया ____bride____ नाम्न्या युवती सह स्वकीय विवाह अंगभूत पाणिग्रहणार्थ वरण ग्रहण कर्मणि शुभता सिद्ध्यर्थं, गणपति कलश ग्रहाणां स्थापनं पूजानंच करिष्ये ॥

Hariḥ oṁ tat sat ……… asyāṁ śubha tithau ___*groom's*___ gotrotpannaḥ ___*groom*___ śarmaṇaḥ ___*bride's*___ gotrotpannayā ___*bride*___ nāmnyā yuvatī saha svakīya vivāha aṅga-bhūta pāṇigrahaṇārtha varaṇa grahaṇa karmaṇi śubhatā siddhyarthaṁ, gaṇapati kalaśa grahāṇāṁ sthāpanaṁ pūjānañca kariṣye ||

❖ Ganesha & Gauri puja, Navagraha Pūjā etc.

❖ Take a tray with clothes, coconut, rice, bananas, betel, dūrva, turmeric and a gold coin.

❖ Perform pūjā and tilak to the groom.

**Vara-Saṅkalpaḥ** पूर्वोक्त गुण विशेषन विसिष्ठायां अस्यां शुभ तिथौ ________ गोत्रः ____dātā______ नाम्ना अहम् _________ गोत्रोत्पन्नया ______Bride____ नाम्न्याः वनिता विवाह अंगभूत पाणिग्रहण कर्तृत्वेन _________ गोत्रोत्पन्नम् _____groom_____ नामकं वरं सुपूजितं एभिः कुंकुमाक्त तंडुल पूरित पात्र श्रीखंड चंदन नारिकेल पूगि-फल हरिद्रा दूर्वा वस्त्रादिभिः यथा शक्ति द्रव्यश्च त्वाम् अहं वृणे ॥

pūrvokta guṇa viśeṣana visiṣṭhāyāṁ asyāṁ śubha tithau ________ gotraḥ ___*dātā*_____ nāmnā aham ________ gotrotpannayā ________ nāmnyāḥ vanitā vivāha aṅgabhūta pāṇigrahaṇa kartṛtvena ________ gotrotpannam ________ nāmakaṁ varaṁ supūjitaṁ ebhiḥ kuṁkumākta taṇḍula pūrita pātra śrīkhaṇḍa candana nārikela pūgi-phala haridrā dūrvā vastrādibhiḥ yathā śakti dravyaśca tvām ahaṁ vṛṇe ||

शुभे कालेऽग्नि सान्निध्ये सुतां स्नाते ह्यरोगिणि ।
अव्यंगेऽपतितेऽक्लीबे दाता तुभ्यं प्रदास्यामि ॥

śubhe kāle'gni sānnidhye sutāṁ snāte hyarogiṇi |
avyaṅge'patite'klībe dātā tubhyaṁ pradāsyāmi ||

*In the auspicious time, in front of the sacred fire I shall bestow my daughter upon you, so long as you remain healthy, virtuous and virile.*

❖ If the brother is the kartā then the following verse is recited:—

तस्मिन् कालेऽग्नि सान्निध्ये भगिनि स्नाते ह्यरोगिणि ।

अव्यंगेऽपतितेऽक्लीबे पिता तुभ्यं प्रदास्यति ॥

tasmin kāle'gni sānnidhye bhagini snāte hyarogiṇi |
avyaṅge'patite'klībe pitā tubhyaṁ pradāsyati ||

Dhātā — दास्यामि x३ dāsyāmi x3

Varaḥ — ॐ स्वस्ति x ३ oṁ svasti x 3

❖ The lagan Patrika can be read at this time.

## Viśva-kalyāna Prārthana

शन्नो मित्र शं वरुणः । शन्नो भवत्वर्यमा । शन्न इंद्रो बृहस्पतिः । शन्नो विष्णुर्-उरुक्रमः । शं नो वातः पवतां मातरिश्वा शं नंस्तपतु सूर्यः । शं नः कनिक्रदद्देवः पर्जन्यो अभि वंर्षतु ॥

śan-no mitra śaṁ varuṇaḥ | śan-no bhavatvaryamā | śan-na indro bṛhaspatiḥ | śan-no viṣṇur-urukramaḥ | śaṁ no vātaḥ pavatāṁ mātariśvā śaṁ nas-tapatu sūryaḥ | śaṁ naḥ kanikradad-devaḥ parjanyo abhi varṣatu ||

*Gracious be Mitra unto us, and Varuna and Aryaman; Indra, Brhaspati be kind, and Vishnu of the mighty stride. May the wind blow pleasantly for us, may Surya warm us pleasantly. Pleasantly, with a roar of thunder, may the God Parjanya send the rain on us. (V.S. 36:10)*

द्यौः शांतिरंतरिक्षगुं शांतिः पृथिवी शांतिराप शांतिरोषधय शांतिः । वनस्पतय शांतिः विश्वेदेवाः शांतिर्ब्रह्म शांतिः सर्वगुं शांतिः शांतिरेव शांतिः सा मा शांतिरेधि ॥

dyauś śāntir antarikṣaguṁ śāntiḥ pṛthivī śāntir āpa śāntir oṣadhaya śāntiḥ | vanaspataya śāntir viśvedevāś śāntir brahma śāntis sarvaguṁ śāntiś śāntir eva śāntis sā mā śāntir edhi ||

*To the Sky be peace, to the atmosphere peace, to the Earth peace, to the waters and Plants be peace. To the Trees peace, to the All-Gods peace, peace to Brahma peace, may the entire Universe have peace , peace indeed peace—may I too experience that peace!*

# VADHU AVALOKANA PRAYOGAḤ

Invitation of the Bride.

(mūh-dekhnī, ṭharaunī, sagāi, kumkuma-ṭīkā)

- The groom's party together with their priest go to the girl's house.
- The girl is sat on an āsana facing the east.
- Perform usual preliminaries, Ganeśa-gaurī pūjā, kalaśa pūjā, Navagraha pūjā.
- The āvaraṇa kartā takes a tray with clothes, jewelery, fruit, flowers, akṣata etc and says:

मंगलं भगवान् विष्णु मंगलं गरुड-ध्वजः । मंगलं पुंडरीकाक्षं मंगलायतनो हरीः ॥

maṅgalaṁ bhagavān viṣṇu maṅgalaṁ garuḍa-dhvajaḥ ।
maṅgalaṁ puṇḍarīkākṣaṁ maṅgalāyatano harīḥ ॥

*The Supreme Being Vishnu is auspicious, the Bearer of the Garuda pendant is auspicious, The lotus-eyed one is auspicious, Hari is the source of all auspiciousness.*

- The kartā stands before the kanyā with the tray of clothes, jewels etc.
- His wife then garlands her
- Taking a coconut covered in turmeric and kumukum, flowers, betel, akṣata, and says:—

ॐ अद्य दत्तैरेभिः वस्त्रालंकारादि द्रव्यैः ________ गोत्रोत्पन्नेन ____groom___ नाम वरेण सहोद्वाहार्थं _______ गोत्रोत्पन्नां ____bride ____ नाम्नीं त्वां संतोषयामि त्वं संतुष्टा भव ॥

oṁ adya dattair ebhir vastrālaṅkārādi dravyaiḥ _______ gotrotpannena ___*groom*___ nāma vareṇa sahodvāhārtham ______ gotrotpannām ___*Bride* ___ nāmnīṁ tvāṁ santoṣayāmi tvaṁ santuṣṭā bhava ॥

*Om, on this day may you .................of the clan ............. who are engaged to wed ................ of the clan of ............... Be gratified with the presentation of these clothes and ornaments etc.*

— he places it in her lap.

- Taking a red silk and gold scarf (chunni) he places it around her neck

अयि तरुणि अनेन आवरण कर्मणा त्वं गायत्री सावित्री सरस्वती व सुभगा भूत्वा सुरक्षिता भव ॥

ayi taruṇi anena āvaraṇa karmaṇā tvaṁ gāyatrī sāvitrī sarasvatī va subhagā bhūtvā surakṣitā bhava ॥

सर्व मंगल मांगल्ये शिवे सर्वार्थ शादिके । शरण्ये त्रयंबके गौरी नारायणी नमोऽस्तु ते ॥

sarva maṅgala māṅgalye śive sarvārtha śādike ।
śaraṇye trayambake gaurī nārāyaṇī namo'stu te ॥

Bride's father says:—

शुभे कालेऽग्नि सान्निध्ये कन्यां स्नाते ह्यरोगिणि । अव्यंगेऽपतितेऽक्लीबे दाता तुभ्यं प्रदास्यामि ॥

śubhe kāle'gni sānnidhye kanyāṁ snāte hyarogiṇi ।
avyaṅge'patite'klībe dātā tubhyaṁ pradāsyāmi ॥

*In the auspicious time, in front of the sacred fire I shall bestow my daughter upon you, so long as you remain healthy, virtuous and virile.*

- ❖ Dakṣiṇa is then given to 2 priests and the bride and kartā bow to the brāhmins.
- ❖ Āśirvādam

# HARIDRĀ-TAILA ABHYAṄGA KARMA

## (Mattkor & Haldwān)

A few days before the wedding, (usually the Friday evening before a Sunday wedding), the *Mattikor* (bringing of dirt), and the *Haridrā-Taila Abhyanga Karma* are performed at the boy's and girl's homes.

The ceremony varies from community to community in slight detail but the general format is as follows.

- ❖ The boy/girl sits on a low stool and Pūjā is done to Gauri-Ganesha, Prithivī, Kalaśa, Lakṣmī/Dīpa, Nava Grahā and Agni (Havan).
- ❖ The kankan with a tiny pen-knife is tied on the right wrist of the groom or bride. The other kankans are tied on the kalaśa, loṭa, grinding-stone, at the top of the bamboo stick with a flower and 5 mango leaves, and at the bottom to secure the banana plant, kusha grass to the bamboo.

## For the Bride

- ❖ One sumaṅgalī drips five drops of oil onto the ground in front of the bride thinking of the five chaste ladies:—

अहल्या द्रौपदी सीता तारा मण्डोदरी तथा । पञ्च-कन्यास्स्मरेन्नित्यं महापातक नाशनम् ॥

ahalyā draupadī sītā tārā maṇḍodarī tathā ।
pañca-kanyās smaren-nityaṁ mahāpātaka nāśanam ॥

*Ahalya, Draupadi, Sita, Tara and Mandodari. One should daily remember the five daughters who destroy great sins*

- ❖ She then touches those five drops, mixes them with some more oil and turmeric and smears it on the head, cheeks, hands and feet of the bride.
- ❖ It is customary for unmarried young ladies or small girls to touch the bride with the Haldi, each 5 times – feet, thighs, shoulder/arms and cheeks. Afterwards, older married women give the bride a "bath" with the Haldi-water.
- ❖ 2 sumaṅgalīs perform hārati and the bride retires to take a bath, dress and receive blessings.

## For the Groom

- ❖ One sumaṅgalī drips seven drops of oil onto the ground in front of the groom thinking of the seven immortals:—

अश्वत्थामा बलिः व्यासो हनुमाञ्श्च विभीषणः । कृपः परशुरामश्च सप्तैते चिर-जीविनः ॥

aśvatthāmā baliḥ vyāso hanumāñśca vibhīṣaṇaḥ ।
kṛpaḥ paraśurāmaśca saptaite cira-jīvinaḥ ॥

*Ashvatthama Bali Vyasa Hanuman and Vibhishana Kripa and Parasurama are the seven long-lived ones.*

- ❖ She then prays to them to bestow longevity on the groom.
- ❖ She then touches those seven drops mixes them with some more oil and turmeric and smears it on the feet, thighs, shoulder/arms and cheeks of the groom and proceeds as for bride.
- ❖ 2 sumaṅgalīs perform hārati and the groom retires to take a bath, dress and receive blessings.

## STAMBHĀROPAṆA VIDHIḤ

(māṇika-stambha sthāpanam, māṇḍhvo)

- ❖ The couple should each undergo the maṅgala snāna ceremony in their own homes.

**Saṅkalpaḥ** — हरिः ॐ तत् सत् ...............। अस्यां शुभ तिथौ कश्यप गोत्रस्य _______ दास अहं मम पुत्रस्य {पुत्र्याः (F)} करिष्यमाण विवाह अंग-भूत स्तंभारोपणं मण्डप आच्छादन आदिकञ्च कर्म गणपत्यादि पूजन पूर्वकं अहं करिष्ये ॥

harih oṁ tat sat ................ asyāṁ śubha tithau kaśyapa gotrasya _______ dāsa ahaṁ mama putrasya {putryāḥ (f)} kariṣyamāṇa vivāha aṅga-bhūta stambhāropaṇaṁ maṇḍapa ācchādana ādikañca karma gaṇapatyādi pūjana pūrvakaṁ ahaṁ kariṣye ||

*Hari Om Tat Sat...On this auspicious day, the groom's gotra is _______ and I, _______ am performing the wedding ceremony of my son/daughter _______ who belongs to the gotra of ________. As preliminary of the wedding rituals, I will be performing the symbolic erecting & decoration of the mandap and other customs along with the worship of Lord Ganesha and other deities.*

- ❖ Perform usual preliminaries with Gauri-ganeśa pūjā etc.
- ❖ The boy's/girl's mother places the soil brought on the Vedi and Bhūmī Pūjā is performed.
- ❖ In the Kalaśa invoke Bhū-devī

आगच्छ सर्व कल्याणि वसुधा लोक-धारिणि । उद्धृतासि वराहेण सशैल वनकानना ॥
रत्ना-करे विष्णुना त्वं धृता-वाराह रूपिणा । आगच्छ वरदे धात्रि यज्ञे-स्मिन् शुभ-दायिनि ॥
भूमिर् भूमिम् आगात् माता-मातरम्-अप्यगात् । भूयां पुत्रैः पशुभिर्यो नो द्वेष्टि स नश्यतु ॥

āgaccha sarva kalyāṇi vasudhā loka-dhāriṇi |
uddhṛtāsi varāheṇa saśaila vanakānanā ||

ratnā-kare viṣṇunā tvaṁ dhṛtā-vārāha rūpiṇā |
āgaccha varade dhātri yajñe-smin śubha-dāyini ||

bhūmir bhūmim āgāt mātā-mātaram-apyagāt |
bhūyāṁ putraiḥ paśubhir yo no dveṣṭi sa naśyatu ||

सर्वोपचार पूजनं —
ॐ भूर्भुवःस्वः पृथिवी कूर्मानंत देवताभ्यो नमः ॥

ॐ भूम्यै नमः । महिष्यै । पृथिव्यै । वसुंधरायै । वासव्यै । हिरण्य-गर्भिन्यै । समुद्रवत्यै । महीधरण्यै । विस्णु-पत्न्यै । व्यापिन्यै । धरायै ॥

sarvopacāra pūjanaṁ —

oṁ bhūr bhuvaḥ svaḥ pṛthivī kūrmānanta devatābhyo namaḥ ||

oṁ bhūmyai namaḥ | mahiṣyai | pṛthivyai | vasundharāyai | vāsavyai | hiraṇya-garbhinyai | samudravatyai | mahīdharaṇyai | visṇu-patnyai | vyāpinyai | dharāyai ||

सर्व बीज समायुक्ते सर्व रत्नौषधी वृते । रूचिरे नंदने देवी वासिष्ठे रम्यताम् इह ॥
तवोपरि करिष्यामि मंडपं सुमनोहरम् । क्षंतव्यं च त्वया देवि सानुकूला मुखे भव ॥
निर्विघ्नं मम कर्मेदं यथा स्यात् त्वं तथा कुरु ॥ सुब्रह्मण्य नमस्तेऽस्तु महापुरुष पूर्वज ॥

sarva bīja samāyukte sarva ratnauṣadhī vṛte |
rūcire nandane devī vāsiṣṭhe ramyatām iha ||
tavopari kariṣyāmi maṇḍapaṁ sumanoharam |
kṣantavyaṁ ca tvayā devi sānukūlā mukhe bhava ||
nirvighnaṁ mama karmedaṁ yathā syāt tvaṁ tathā kuru ||
subrahmaṇya namaste'stu mahāpuruṣa pūrvaja ||

- ❖ Scatter some mustard seeds.

अपसर्पन्तु ते भूता ये भूता भुवि सम्स्थिताः । ये भूता विघ्न-कर्तारः ते नश्यन्तु शिवाज्ञया ॥

apasarpantu te bhūtā ye bhūtā bhuvi samsthitāḥ |
ye bhūtā vighna-kartāras te naśyantu śivājñayā ||

*Let all the negative forces who are present on the earth withdraw. May all beings who are causing obstacles be destroyed by the command of Lord Śiva.*

- ❖ Dig a hole for planting the stambha or prepare a pot for it.
- ❖ Wash the stambha with water, anoint it with oil and turmeric.
- ❖ Take some flowers, turmeric, gandha & akshata in the hand and recite the following:-

स्तम्भस्त्वं निर्मितः पूर्वं यज्न-भागः सुरेश्वरः । स्तुतो मण्डप रक्षार्थं पुजां पुष्पादिकां तथा ॥
गृहीत्वा सुस्थिरो भूत्वा यजमानोदयं कुरु ॥

stambhas-tvaṁ nirmitaḥ pūrvaṁ yajna-bhāgaḥ sureśvaraḥ |
stuto maṇḍapa rakṣārthaṁ pujāṁ puṣpādikāṁ tathā ||
gṛhītvā susthiro bhūtvā yajamānodayaṁ kuru ||

*You are the sacrificial pillar that was erected in the [yajñas] past, a part of the sacrifice, and the Lord of the gods. It was praised for protecting the pavilion and offered worship and flowers. Accept this worship and be very steady and may the yajamān flourish.*

- ❖ Place akṣata, puṣpa, kumkuma, tāmbulam, turmeric and darbhān in the hole.

- ❖ insert the mānik stambha and say:-

ॐ गर्ता धिष्ठात्रि वासुकिने देवाय नमः । सुप्रतिष्ठस्त्वं भव विवाह अवधिकालं स्थिरो भव ।
विवाह्यस्यायुर्वर्धनस्त्वं सर्व सौख्य प्रदो भव ॥

oṁ gartādhiṣṭhātri vāsukine devāya namaḥ |
oṁ supratiṣṭhas-tvaṁ bhava vivāha avadhikālaṁ sthiro bhava |
vivāhyasyāyur vardhanas-tvaṁ sarva saukhya prado bhava ||

❖ Fill the hole with sand:—

ॐ स्तंभाधिष्ठात्रि देवाय नमः ।
त्वां प्रार्थये ह्यहं स्तंभ लोकानां शांति दायक । देहि मेऽनुग्रहं स्तंभ प्रसीद कुरु सुप्रभो ।।
oṁ stambhādhiṣṭhātri devāya namaḥ |
tvāṁ prārthaye hyahaṁ stambha lokānāṁ śānti dāyaka |
dehi me'nugrahaṁ stambha prasīda kuru suprabho ||

❖ Some people now do the *maṇḍapācchādana* or covering of the maṇḍapa.
❖ Four poles are planted in the ground and a cloth is tied over them.

## KHAḌGA (SWORD) PŪJĀ[2]

**Saṅkalpaḥ** – हरिः ॐ तत् सत् ...............। अस्यां शुभ तिथौ मम मम पुत्रस्य {पुत्र्याः (f)} विवाह पूर्वंग भूत खड्ग पूजनं अहम् अद्य करिष्ये ।।

— harih oṁ tat sat ............... asyāṁ śubha tithau mama mama putrasya {putryāḥ (f)} vivāha pūrvaṅga bhūta khaḍga pūjanaṁ aham adya kariṣye ||

❖ In the northern direction prepare a vedi — upon a wooden pīṭham place a red cloth and a pile of rice. In the rice draw a nine petalled lotus.
❖ On it, place the sword.
❖ Sprinkle it with water while reciting — oṁ huṁ phaṭ
❖ Make flower offerings on the 8 petals of the lotus beginning in the east:—

| | |
|---|---|
| ॐ हां देव्यै नमः । | oṁ hāṁ devyai namaḥ \| |
| ॐ हां वाग्-देव्यै नमः । | oṁ hāṁ vāg-devyai namaḥ \| |
| ॐ हां पार्वत्यै नमः । | oṁ hāṁ pārvatyai namaḥ \| |
| ॐ हां कृत्तिकायै नमः । | oṁ hāṁ kṛttikāyai namaḥ \| |
| ॐ हां महा-लक्ष्म्यै नमः । | oṁ hāṁ mahā-lakṣmyai namaḥ \| |
| ॐ हां रक्त-शक्त्यै नमः । | oṁ hāṁ rakta-śaktyai namaḥ \| |
| ॐ हां काल्यै नमः । | oṁ hāṁ kālyai namaḥ \| |
| ॐ हां चण्डिकायै नमः । | oṁ hāṁ caṇḍikāyai namaḥ \| |

❖ In the center:—

| | |
|---|---|
| ॐ हां वीर-शक्त्यै नमः । | oṁ hāṁ vīra-śaktyai namaḥ \| |

[2] Done mainly by Sindhis

❖ If time permits offer puja to all the above 9 shaktis

## Khaḍga Śakti āvahanam

❖ Place some flowers and akshata on the sword:—

ॐ हां खड्गेशासनाय नमः । oṁ hāṁ khaḍgeśāsanāya namaḥ ।
ॐ हां खड्गेश मूर्तये नमः । oṁ hāṁ khaḍgeśa mūrtaye namaḥ ।

### Dhyānam

करवाल कपालाष्यं धृत शार्दूल वाससम् । अट्टहासोलसन् चक्रं कर्पूर मुख वासिनम् ॥
रत्न-कुण्डल केयूर ज्वलत् पावक सन्निभम् । खड्गेशं भावयेत् देवं सर्वभिष्टार्थ सिद्धये ॥

karavāla kapālāṣyaṁ dhṛta śārdūla vāsasam ।
aṭṭahāsolasan cakraṁ karpūra mukha vāsinam ॥
ratna-kuṇḍala keyūra jvalat pāvaka sannibham ।
khaḍgeśaṁ bhāvayet devaṁ sarvabhiṣṭārtha siddhaye ॥

*He is wearing a tiger's robe with a kerchief on his forehead. The camphor-faced Lord is laughing loudly as he wields his discus. His jeweled earrings and necklace are like burning fire. One should thus meditate on the Lord of the sword for the fulfillment of all one's desires.*

❖ Offer 16 upacāras using the mūla mantra —

ॐ हां खड्गेशाय नमः । oṁ hāṁ khaḍgeśāya namaḥ ॥

❖ Bathe it in the 5 nectars – milk, yoghurt, honey, ghee and sugar-water
❖ After the main pūjā invoke the shaktis and the bhairavas:—

ॐ हां ब्राह्म्यै नमः । oṁ hāṁ brāhmyai namaḥ ।
ॐ हां महेश्वर्यै नमः । oṁ hāṁ maheśvaryai namaḥ ।
ॐ हां कलअमार्यै नमः । oṁ hāṁ kalamāryai namaḥ ।
ॐ हां वैष्णव्यै नमः । oṁ hāṁ vaiṣṇavyai namaḥ ।
ॐ हां वाराह्यै नमः । oṁ hāṁ vārāhyai namaḥ ।
ॐ हां महेन्द्र्यै नमः । oṁ hāṁ mahendryai namaḥ ।
ॐ हां चमुण्डायै नमः । oṁ hāṁ camuṇḍāyai namaḥ ।
ॐ हां वीर-भद्रायै नमः । oṁ hāṁ vīra-bhadrāyai namaḥ ।

❖ In the 8 directions around the khadga invoke the 8 bhairavas:—

ॐ हां असितांग भैरवाय नमः । oṁ hāṁ asitāṅga bhairavāya namaḥ ।
ॐ हां रुरु भैरवाय नमः । oṁ hāṁ ruru bhairavāya namaḥ ।
ॐ हां चण्ड भैरवाय नमः । oṁ hāṁ caṇḍa bhairavāya namaḥ ।
ॐ हां क्रोधन भैरवाय नमः । oṁ hāṁ krodhana bhairavāya namaḥ ।
ॐ हां उन्मत्त भैरवाय नमः । oṁ hāṁ unmatta bhairavāya namaḥ ।
ॐ हां कपालइ भैरवाय नमः । oṁ hāṁ kapāli bhairavāya namaḥ ।

ॐ हां भीषण भैरवाय नमः । — oṁ hāṁ bhīṣaṇa bhairavāya namaḥ |
ॐ हां संहार भैरवाय नमः । — oṁ hāṁ saṁhāra bhairavāya namaḥ |

- ❖ If you so desire you can also perform a simple homa using the mūla mantra as well as making offerings to all the shaktis and bhairavas.



## Viśva-kalyāna Prārthana

शन्नो मित्र शं वरुणः । शन्नो भवत्वर्यमा । शन्न इंद्रो बृहस्पतिः । शन्नो विष्णुर्-उरुक्रमः । शं नो वातः पवतां मातरिश्वा शं नंस्तपतु सूर्यः । शं नः कनिक्रदद्देवः पर्जन्यो अभि वर्षतु ॥

śan-no mitra śaṁ varuṇaḥ | śan-no bhavatvaryamā | śan-na indro bṛhaspatiḥ | śan-no viṣṇur-urukramaḥ | śaṁ no vātaḥ pavatāṁ mātariśvā śaṁ nas-tapatu sūryaḥ | śaṁ naḥ kanikradad-devaḥ parjanyo abhi varṣatu ||

*Gracious be Mitra unto us, and Varuna and Aryaman; Indra, Brhaspati be kind, and Vishnu of the mighty stride. May the wind blow pleasantly for us, may Surya warm us pleasantly. Pleasantly, with a roar of thunder, may the God Parjanya send the rain on us. (V.S. 36:10)*

द्यौः शांतिरंतरिक्षगुं शांतिः पृथिवी शांतिराप शांतिरोषधय शांतिः । वनस्पतय शांतिः विश्वेदेवाः शांतिर्ब्रह्म शांतिः सर्वगुं शांतिः शांतिरेव शांतिः सा मा शांतिरेधि ॥

dyauś śāntir antarikṣagum śāntiḥ pṛthivī śāntir āpa śāntir oṣadhaya śāntiḥ | vanaspataya śāntir viśvedevāś śāntir brahma śāntis sarvaguṁ śāntiś śāntir eva śāntis sā mā śāntir edhi ||

*To the Sky be peace, to the atmosphere peace, to the Earth peace, to the waters and Plants be peace. To the Trees peace, to the All-Gods peace, peace to Brahma peace, may the entire Universe have peace , peace indeed peace—may I too experience that peace!*

# HIRANYA ŚRĀDDHA [NĀNDĪ]

- 4 trays are prepared each one with some rice, dahl, a green banana, betel leaf and nut and a small pot of honey and some yoghurt.

नमो ब्रह्मण्य देवाय गो-ब्राह्मण हिताय च । जगधिताय कृष्णाय गोविन्दाय नमो नमह् ॥

namo brahmaṇya devāya go-brāhmaṇa hitāya ca ।
jagad-hitāya kṛṣṇāya govindāya namo namah ॥

नमो नमस्ते गोविन्द पुराण पुरुषोत्तम । इदं श्राद्धं हृषीकेश रक्षतां सर्वतो दिशः ॥

namo namaste govinda purāṇa puruṣottama ।
idaṁ śrāddhaṁ hṛṣīkeśa rakṣatāṁ sarvato diśaḥ ॥

देवताभ्यः पितृभ्यश्च महा योगीभ्य एव च । नमस्स्वाहायै स्वधायै नित्यम् एव नमो नमः ॥

devatābhyaḥ pitṛbhyaśca mahā yogībhya eva ca ।
namas svāhāyai svadhāyai nityam eva namo namaḥ ॥

अपवित्रः पवित्रो वा सर्वावस्थं-गतोपि वा । यस्स्मरेत् पुण्डरिकाक्षं स बाह्याभ्यन्तरश्शुचिः ॥

apavitraḥ pavitro vā sarvāvasthaṁ-gatopi vā ।
yas-smaret puṇḍarikākṣaṁ sa bāhyābhyantaraś-śuciḥ ॥

**Saṅkalpaḥ** — गोविन्द x३ ......... कश्यप गोत्रस्य _______ नाम अहं मम स्वकीय मम पुत्रस्य (m) / पुत्र्याः (f) _______ नाम/नाम्नीं श्वः /अद्य करिष्यमान विवाहांगत्वेन सांगत-सिद्धि-द्वारा श्री परमेश्वर प्रीत्यर्थं सांकल्पिकेन विधिना ब्राह्मण युग्म भोजन् पर्याप्त अन्न निष्क्रयी भूत यथा शक्ति हिरण्येन नान्दी श्राद्धम् अहं करिष्ये ॥

govinda x3 ......... kaśyapa gotrasya _______ nāma ahaṁ mama svakīya mama putrasya (m) / putryāḥ (f) _______ nāma/nāmnīṁ śvaḥ /adya kariṣyamāna vivāhāṅgatvena sāṅgata-siddhi-dvārā śrī parameśvara prītyarthaṁ sāṅkalpikena vidhinā brāhmaṇa yugma bhojan paryāpta anna niṣkrayī bhūta yathā śakti hiraṇyena nāndī śrāddham ahaṁ kariṣye ॥

*On this auspicious day with the sanction of the Supreme Being and as service to Him alone, [in order to absolve myself of all sins and to please the Supreme Lord] I now perform the memorial rite to my ancestors through charity.*

1. **Paternal males**.

अद्य विवाह कर्माङ्ग कश्यप गोत्रस्य
adya vivāha karmāṅga kaśyapa gotrasya

श्री ___________________________ पितामह ।
śrī ___________________________ pitāmaha । *Grand-father*

श्री ___________________________प्रपिता-मह ।
śrī ___________________________ prapitā-maha । *Great grand-father*

श्री ___________________________वृद्ध पिता मह ।
śrī ___________________________ vṛddha pitā maha | *Great Great grandfather*

**2. Paternal females.** कश्यप गोत्रस्य/ kaśyapa gotrasya

श्रीमति _________________________पितामहि ।
śrīmati _________________________ pitāmahi | *Father's mother*

श्रीमति _________________________प्रपिता-महि ।
śrīmati _________________________ prapitā-mahi | *grandfather's mother*

श्रीमति _________________________वृद्ध पिता महि ।
śrīmati _________________________ vṛddha pitā mahi | *great grandfather's , mother*

**3. Maternal males** कश्यप गोत्रस्य/ kaśyapa gotrasya

श्री _____________________________मातामह ।
śrī _____________________________ mātāmaha | *mother's father*

श्री _____________________________प्र-मातामह ।
śrī _____________________________ pra-mātāmaha | *mother's paternal grandfather*

श्री _____________________________ वृद्ध प्रमातामह ।
śrī ___________________________ vṛddha pramātāmaha | *mother's paternal great grandfather*

**4. Maternal females** कश्यप गोत्रस्य/ kaśyapa gotrasya

श्रीमति ___________________________मातामहि ।
śrīmati ___________________________ mātāmahi | *Mother's mother*

श्रीमति ___________________________प्र-मातामहि ।
śrīmati ___________________________ pra-mātāmahi | *Mother's father's mother*

श्रीमति _________________________वृद्ध प्रमातामहि ।
śrīmati _________________________ vṛddha pramātāmahi | *Mother's grandfather's mother*

सर्वेषां पित्रुनां आवाहनार्थं अस्मिन् नान्दि-श्राद्धे दर्भ-मय ब्राह्मणां स्थापनं करिष्ये ॥

sarveṣāṁ pitrunāṁ āvāhanārthaṁ asmin nāndi-śrāddhe darbha-maya brāhmaṇāṁ sthāpanaṁ kariṣye ||

## Pāda Prakṣālanam

❖ Four kurcas are placed on 4 appropriate āsanas and water sprinkled on them.

१. सत्य-वसु संज्ञका विश्वेदेवा नान्दी-मुखाः — ॐ भूर्भुवस्स्वः । इदं वः पाद्यं पादावनेजनं पाद-प्रक्षालनं स्वाहा । सम्पद्यतां वृद्धिः ॥

1. satya-vasu saṁjñakā viśvedevā nāndī-mukhāḥ — oṁ bhūrbhuvas svaḥ | idaṁ vaḥ

pādyaṁ pādāvanejanaṁ pāda-prakṣālanaṁ svāhā | sampadyatāṁ vṛddhiḥ ||

२. (paternal) स्वगोत्राः मातृ पितामही प्रपितामह्य नान्दी मुख्यः — ॐ भूर्भुवस्स्वः इदं वः पाद्यं पादावनेजनं पाद-प्रक्षालनं स्वाहा । सम्पद्यतां वृद्धिः ॥
2. svagotrāḥ mātṛ pitāmahī prapitāmahya nāndī mukhyaḥ — oṁ bhūrbhuvas svaḥ idaṁ vaḥ pādyaṁ pādāvanejanaṁ pāda-prakṣālanaṁ svāhā | sampadyatāṁ vṛddhiḥ ||

३. (paternal) स्वगोत्राः पित्र् पितामह प्रपितामहाः नान्दी मुखाः — ॐ भूर्भुवस्स्वः । इदं वः पाद्यं पादावनेजनं पाद-प्रक्षालनं स्वाहा । सम्पद्यतां वृद्धिः ॥
3. svagotrāḥ pitr pitāmaha prapitāmahāḥ nāndī mukhāḥ — oṁ bhūrbhuvas svaḥ | idaṁ vaḥ pādyaṁ pādāvanejanaṁ pāda-prakṣālanaṁ svāhā | sampadyatāṁ vṛddhiḥ ||

४. (maternal) द्वितीय गोत्राः मातामह प्रमाता-मह वृद्ध प्रमाता-महाः सपत्नीका नान्दी मुखाः — ॐ भूर्भुवस्स्वः । इदं वः पाद्यं पादावनेजनं पाद-प्रक्षालनं स्वाहा । सम्पद्यतां वृद्धिः ॥

4. dvitīya gotrāḥ mātāmaha pramātā-maha vṛddha pramātā-mahāḥ sapatnīkā nāndī mukhāḥ — oṁ bhūrbhuvas svaḥ | idaṁ vaḥ pādyaṁ pādāvanejanaṁ pāda-prakṣālanaṁ svāhā | sampadyatāṁ vṛddhiḥ ||

## Āsanam

❖ Offer yava (barley) on each āsanam

१. सत्यवसु संज्ञकानां विश्वेषां देवानां नान्दी-मुखानां, ॐ भूर्भुवस्स्वः, इदम् आसनं सुखासनं स्वाहा नमः सम्पद्यतां वृद्धिः । नान्दी-श्राद्धे क्षणौ क्रियेतां । ॐ तथा प्राप्नुतां भवन्तौ प्राप्नुवावः ॥

1. satyavasu saṁjñakānāṁ viśveṣāṁ devānāṁ nāndī-mukhānāṁ, oṁ bhūrbhuvas svaḥ, idaṁ āsanaṁ sukhāsanaṁ svāhā namaḥ sampadyatāṁ vṛddhiḥ | nāndī-śrāddhe kṣaṇau kriyetāṁ | oṁ tathā prāpnutāṁ bhavantau prāpnuvāvaḥ ||

२. स्वगोत्राणां मातृ पितामही प्रपितामहीनां नान्दी मुखानां, ॐ भूर्भुवस्स्वः इदम् आसनं सुखासनं स्वाहा नमः सम्पद्यतां वृद्धिः । नान्दी-श्राद्धे क्षणौ क्रियेतां । ॐ तथा प्राप्नुतां भवन्तौ प्राप्नुवावः ॥

2. svagotrāṇāṁ mātṛ pitāmahī prapitāmahīnāṁ nāndī mukhānāṁ, oṁ bhūrbhuvas svaḥ idaṁ āsanaṁ sukhāsanaṁ svāhā namaḥ sampadyatāṁ vṛddhiḥ | nāndī-śrāddhe kṣaṇau kriyetāṁ | oṁ tathā prāpnutāṁ bhavantau prāpnuvāvaḥ ||

३. स्वगोत्राणां पित्र् पितामह प्रपितामहानां नान्दी मुखानां, ॐ भूर्भुवस्स्वः इदम् आसनं सुखासनं स्वाहा नमः सम्पद्यतां वृद्धिः । नान्दी-श्राद्धे क्षणौ क्रियेतां । ॐ तथा प्राप्नुतां भवन्तौ प्राप्नुवावः ॥

3. svagotrāṇāṁ pitr pitāmaha prapitāmahānāṁ nāndī mukhānāṁ, oṁ bhūrbhuvas svaḥ idaṁ āsanaṁ sukhāsanaṁ svāhā namaḥ sampadyatāṁ vṛddhiḥ | nāndī-śrāddhe kṣaṇau kriyetāṁ | oṁ tathā prāpnutāṁ bhavantau prāpnuvāvaḥ ||

४. द्वितीय गोत्राणां मातामह प्रमातामह वृद्ध प्रमातामहानां सपत्नीकानां नान्दी मुखानां, ॐ भूर्भुवस्स्वः इदम् आसनं सुखासनं स्वाहा नमः सम्पद्यतां वृद्धिः । नान्दी-श्राद्धे क्षणौ क्रियेतां । ॐ तथा प्राप्नुतां भवन्तौ प्राप्नुवावः ॥

4. dvitīya gotrāṇāṁ mātāmaha pramātāmaha vṛddha pramātāmahānāṁ sapatnīkānāṁ nāndī mukhānāṁ, oṁ bhūrbhuvas svaḥ idaṁ āsanaṁ sukhāsanaṁ svāhā namaḥ sampadyatāṁ vṛddhiḥ | nāndī-śrāddhe kṣaṇau kriyetāṁ | oṁ tathā prāpnutāṁ bhavantau prāpnuvāvaḥ ||

## Upacāra

❖ Offer gandha, puṣpa, dhūpa, dīpa, tāmbūla, yajñopavīta and vastra on the āsanam.

Gandham अमी वः सकुंकुम कर्पूर अगुरु चंपक पद्मक मिश्र गन्धाः ॥
amī vaḥ sakuṁkuma karpūra aguru caṁpaka padmaka miśra gandhāḥ ||

Puṣpāni इमानि पुष्पानि श्री तुलसी दलानि च ॥
imāni puṣpāni śrī tulasī dalāni ca ||

Dhūpam घ्राण तृप्ति अर्थं अयं वो धूपः ॥
ghrāṇa tṛpti arthaṁ ayaṁ vo dhūpaḥ ||

Dīpam अवलोकन अर्थं अयं वो दीपः ॥
avalokana arthaṁ ayaṁ vo dīpaḥ ||

Vastram आच्छादन अर्थं इदं वस्त्रं [यज्ञोपवीतं दर्भान् वा]
ācchādana arthaṁ idaṁ vastraṁ [yajñopavītaṁ darbhān vā]

Akṣata शेष उपचार अर्थम् इमे अक्षताः
śeṣa upacāra artham ime akṣatāḥ

१. सत्यवसु संज्ञकेभ्यो विश्वेभ्यो देवेभ्यो नान्दीमुखेभ्य इदं गन्धाद्यर्चनं स्वाहा । संपद्यतां वृद्धिः ॥

1. satyavasu saṁjñakebhyo viśvebhyo devebhyo nāndīmukhebhya idaṁ gandhādyarcanaṁ svāhā | saṁpadyatāṁ vṛddhiḥ ||

२. स्व-गोत्रेभ्यो मातृ पितामही प्रपितामहीभ्यो नान्दी-मुखेभ्य इदं गन्धाद्यर्चनं स्वाहा । संपद्यतां वृद्धिः ॥

2. sva-gotrebhyo mātṛ pitāmahī prapitāmahībhyo nāndī-mukhebhya idaṁ gandhādyarcanaṁ svāhā | saṁpadyatāṁ vṛddhiḥ ||

३. स्वगोत्रेभ्यः पितृ पितामह प्रपितामहेभ्यो नान्दी-मुखेभ्यः इदं गन्धाद्यर्चनं स्वाहा । संपद्यतां वृद्धिः ॥

3. svagotrebhyaḥ pitṛ pitāmaha prapitāmahebhyo nāndī-mukhebhyaḥ idaṁ gandhādyarcanaṁ svāhā | saṁpadyatāṁ vṛddhiḥ ||

४. द्वितीय गोत्रेभ्यो मातामह प्रमातामह वृद्ध प्रमातामहेभ्यः सपत्नीकेभ्यो नान्दी-मुखेभ्य इदं गन्धाद्यर्चनं स्वाहा । संपद्यतां वृद्धिः ॥

4. dvitīya gotrebhyo mātāmaha pramātāmaha vṛddha pramātāmahebhyaḥ sapatnīkebhyo nāndī-mukhebhya idaṁ gandhādyarcanaṁ svāhā | saṁpadyatāṁ vṛddhiḥ ||

❖ The yajamāna touches the 4 trays containing rice, dadhi, honey etc.:—

१. सत्यवसु संज्ञकेभ्यो विश्वेभ्यो देवेभ्यो नान्दी-मुखेभ्यो युग्म-रूपेभ्यः — ॐ भूर्भुवस्स्वः । इमानि तण्डुलादीनि स्वाहा ॥

1. satyavasu saṁjñakebhyo viśvebhyo devebhyo nāndī-mukhebhyo yugma-rūpebhyaḥ — oṁ bhūrbhuvas svaḥ | imāni taṇḍulādīni svāhā ||

२. स्व-गोत्रेभ्यो मातृ पितामही प्रपितामहीभ्यो नान्दी-मुखेभ्यः — ॐ भूर्भुवस्स्वः । इमानि तण्डुलादीनि स्वाहा ॥

2. sva-gotrebhyo mātṛ pitāmahī prapitāmahībhyo nāndī-mukhebhyaḥ — oṁ bhūrbhuvas svaḥ | imāni taṇḍulādīni svāhā ||

३. स्व-गोत्रेभ्यः पितृ पितामह प्रपितामहेभ्यो नान्दी-मुखेभ्यः — ॐ भूर्भुवस्स्वः । इमानि तण्डुलादीनि स्वाहा ॥

3. sva-gotrebhyaḥ pitṛ pitāmaha prapitāmahebhyo nāndī-mukhebhyaḥ — oṁ bhūrbhuvas svaḥ | imāni taṇḍulādīni svāhā ||

४. द्वितीय गोत्रेभ्यो मातामह प्रमातामह वृद्ध प्रमातामहेभ्यो सप्तनीकेभ्यो नान्दी-मुखेभ्यः — ॐ भूर्भुवस्स्वः । इमानि तण्डुलादीनि स्वाहा ।

4. dvitīya gotrebhyo mātāmaha pramātāmaha vṛddha pramātāmahebhyo saptanīkebhyo nāndī-mukhebhyaḥ — oṁ bhūrbhuvas svaḥ | imāni taṇḍulādīni svāhā |

## Āma Dānam

- ❖ Taking water and coin in the hand the yajamana pours it out with the following:—

हिरण्य-गर्भ गर्भस्थं हेम बीज विभावसोः । अनन्त पुण्य फलदमतः शान्तिं प्रयच्छ मे ॥

hiraṇya-garbha garbhasthaṁ hema bīja vibhāvasoḥ |
ananta puṇya phaladamataḥ śāntiṁ prayaccha me ||

१. सत्य-वसु संज्ञकेभ्यो विश्वेभ्यो देवेभ्यो नान्दी-मुखेभ्यो ब्राह्मण युग्म भोजन पर्याप्तम् अन्नं तन् निष्क्रयी भूतं किञ्चिद् हिरण्यं दत्तम् अमृत रूपेण स्वाह सम्पद्यतां वृद्धिः ॥

1. satya-vasu saṁjñakebhyo viśvebhyo devebhyo nāndī-mukhebhyo brāhmaṇa yugma bhojana paryāptam annaṁ tan niṣkrayī bhūtaṁ kiñcid hiraṇyaṁ dattam amṛta rūpeṇa svāha sampadyatāṁ vṛddhiḥ ||

२. स्वगोत्रेभ्यो मातृ पितामही प्रपितामहीभ्यो नान्दी-मुखेभ्यः ब्राह्मण युग्म भोजन पर्याप्तम् अन्नं तन् निष्क्रयी भूतं किञ्चिद् हिरण्यं दत्तम् अमृत रूपेण स्वाह सम्पद्यतां वृद्धिः ॥

2. svagotrebhyo mātṛ pitāmahī prapitāmahībhyo nāndī-mukhebhyaḥ brāhmaṇa yugma bhojana paryāptam annaṁ tan niṣkrayī bhūtaṁ kiñcid hiraṇyaṁ dattam amṛta rūpeṇa svāha sampadyatāṁ vṛddhiḥ ||

३. स्वगोत्रेभ्यः पित्र् पितामह प्रपितामहेभ्यो नान्दीमुखेभ्यः ब्राह्मण युग्म भोजन पर्याप्तम् अन्नं तन् निष्क्रयी भूतं किञ्चिद् हिरण्यं दत्तम् अमृत रूपेण स्वाह सम्पद्यतां वृद्धिः ॥

3. svagotrebhyaḥ pitr pitāmaha prapitāmahebhyo nāndīmukhebhyaḥ brāhmaṇa yugma bhojana paryāptam annaṁ tan niṣkrayī bhūtaṁ kiñcid hiraṇyaṁ dattam amṛta rūpeṇa svāha sampadyatāṁ vṛddhiḥ ||

४. द्वितीय गोत्रेभ्यो मातामह प्रमातामह वृद्ध प्रमातामहेभ्यो सप्तनीकेभ्यो नान्दीमुखेभ्यः ब्राह्मण युग्म भोजन पर्याप्तम् अन्नं तन् निष्क्रयी भूतं किञ्चिद् हिरण्यं दत्तम् अमृत रूपेण स्वाह सम्पद्यतां वृद्धिः ॥

4. dvitīya gotrebhyo mātāmaha pramātāmaha vṛddha pramātāmahebhyo saptanīkebhyo nāndīmukhebhyaḥ brāhmaṇa yugma bhojana paryāptam annaṁ tan niṣkrayī bhūtaṁ kiñcid hiraṇyaṁ dattam amṛta rūpeṇa svāha sampadyatāṁ vṛddhiḥ ||

❖ Offer a libation of water, milk, and barley —

१. ॐ सत्य वसु-संज्ञका विश्वेदेवाः नान्दीमुखाः प्रीयन्ताम् ॥
1. oṁ satya vasu-saṁjñakā viśvedevāḥ nāndīmukhāḥ prīyantām ||

२. ॐ स्वगोत्राः मातृ पितामही प्रपितामह्यः नान्दीमुख्यः प्रीयन्ताम् ॥
2. oṁ svagotrāḥ mātṛ pitāmahī prapitāmahyaḥ nāndīmukhyaḥ prīyantām ||

३. ॐ स्वगोत्राणाः पित्र् पितामह प्रपितामहाः नान्दी मुखाः प्रीयन्ताम् ॥
3. oṁ svagotrāṇāḥ pitr pitāmaha prapitāmahāḥ nāndī mukhāḥ prīyantām ||

४. ॐ द्वितीय गोत्राः मातामह प्रमातामह वृद्ध प्रमातामहाः सप्तनीकाः नान्दी मुखाः प्रीयन्ताम् ॥
4. oṁ dvitīya gotrāḥ mātāmaha pramātāmaha vṛddha pramātāmahāḥ saptanīkāḥ nāndī mukhāḥ prīyantām ||

द्यौः शांतिरंतरिक्षगुं शांतिः पृथिवी शांतिराप शांतिरोषधय शांतिः । वनस्पतय शांतिः विश्वेदेवाः शांतिर्ब्रह्म शांतिः सर्वगुं शांतिः शांतिरेव शांतिः सा मा शांतिरेधि ॥

dyauś śāntir antarikṣaguṁ śāntiḥ pṛthivī śāntir āpa śāntir oṣadhaya śāntiḥ | vanaspataya śāntir viśvedevāś śāntir brahma śāntis sarvaguṁ śāntiś śāntir eva śāntis sā mā śāntir edhi ||

## Dakṣiṇa Dānam

❖ Dakṣiṇa is offered on each tray.

१. सत्य-वसु संज्ञकेभ्यो विश्वेभ्यो देवेभ्यो नान्दी मुखेभ्यो युग्म रूपेभ्यः कृतस्य नान्दी श्राद्धस्य फल प्रतिष्ठा सिद्ध्यर्थम् इमां दक्षिणां अहं सम्प्रददे ॥
1. satya-vasu saṁjñakebhyo viśvebhyo devebhyo nāndī mukhebhyo yugma rūpebhyaḥ kṛtasya nāndī śrāddhasya phala pratiṣṭhā siddhyartham imāṁ dakṣiṇāṁ ahaṁ sampradade ||

२. स्व-गोत्रेभ्यो मातृ पितामही प्रपिता-महीभ्यो नान्दी मुखेभ्यः कृतस्य नान्दी श्राद्धस्य फल प्रतिष्ठा सिद्ध्यर्थम् इमां दक्षिणां अहं सम्प्रददे ॥
2. sva-gotrebhyo mātṛ pitāmahī prapitā-mahībhyo nāndī mukhebhyaḥ kṛtasya nāndī śrāddhasya phala pratiṣṭhā siddhyartham imāṁ dakṣiṇāṁ ahaṁ sampradade ||

३. स्व-गोत्रेभ्यः पित्र् पितामह प्रपितामहेभ्यो नान्दी मुखेभ्यः कृतस्य नान्दी श्राद्धस्य फल प्रतिष्ठा सिद्ध्यर्थम् इमां दक्षिणां अहं सम्प्रददे ॥

3. sva-gotrebhyaḥ pitr pitāmaha prapitāmahebhyo nāndī mukhebhyaḥ kṛtasya nāndī śrāddhasya phala pratiṣṭhā siddhyartham imāṁ dakṣiṇāṁ ahaṁ sampradade ||

४. द्वितीय गोत्रेभ्यो मातामह प्रमातामह वृद्ध प्रमातामहेभ्यो सप्तनीकेभ्यो नान्दी मुखेभ्यः कृतस्य नान्दी श्राद्धस्य फल प्रतिष्ठा सिद्ध्यर्थम् इमां दक्षिणां अहं सम्प्रददे ॥

4. dvitīya gotrebhyo mātāmaha pramātāmaha vṛddha pramātāmahebhyo saptanīkebhyo nāndī mukhebhyaḥ kṛtasya nāndī śrāddhasya phala pratiṣṭhā siddhyartham imāṁ dakṣiṇāṁ ahaṁ sampradade ||

## Prārthana

पिता मे परमो धर्मः पिता मे परमं तपः । स्वर्गः पिता मे तत्तृप्तौ तृप्तं अस्त्यखिलं जगत् ॥

pitā me paramo dharmaḥ pitā me paramaṁ tapaḥ |
svargaḥ pitā me tat tṛptau tṛptam astyakhilaṁ jagat ||

*My father is my highest Dharma. My father is my highest asuterity. My father is my Heaven. On my father being satisfied, the whole Universe is satisfied.*

माता मे परमो धर्मः माता मे परमं तपः । स्वर्गः माता मे तत् तृप्तौ तृप्तमस्त्यखिलं जगत् ॥

mātā me paramo dharmaḥ mātā me paramaṁ tapaḥ |
svargaḥ mātā me tat tṛptau tṛptam astyakhilaṁ jagat ||

*My mother is my highest Dharma. My mother is my highest asuterity. My mother is my Heaven. On my mother being satisfied, the whole Universe is satisfied.*

मातरं पितरं चैव साक्षात् प्रत्यक्ष देवताम् । जनन्या वर्द्धितो देहो जनकेन प्रपोषितः ।
तस्मात् क्रतज्ञ भावेन भूयो भूयो नमाम्यहम् ॥

mātaraṁ pitaraṁ caiva sākṣāt pratyakṣa devatām |
jananyā varddhito deho janakena prapoṣitaḥ |
tasmāt krtajña bhāvena bhūyo bhūyo namāmyaham ||

*"I offer repeated obeisance with gratefulness to my mother, father who are directly visible forms of the Divine before me. This body of mine was brought into being by my mother and nourished by my father. Therefore, with a sense of gratitude, I bow to them again and again."*

माता पितामही चैव तथैव प्रपितामही । पिता पितामहश्चैव तथैव प्रपितामहः ॥
मातामहस्तत् पिता च प्रमाता महकादयः । एते भवन्तु सुप्रीताः प्रयच्छन्तु च मङ्गलम् ॥

mātā pitāmahī caiva tathaiva prapitāmahī |
pitā pitāmahaścaiva tathaiva prapitāmahaḥ ||
mātāmahas tat pitā ca pramātā mahakādayaḥ |
ete bhavantu suprītāḥ prayacchantu ca maṅgalam ||

आशिषो मे प्रदीयन्तां पितरः करुणामयाः । वेदाः सन्ततयो नित्यं वर्द्धन्तां बान्धवा मम ।

āśiṣo me pradīyantāṁ pitaraḥ karuṇāmayāḥ |
vedāḥ santatayo nityaṁ varddhantāṁ bāndhavā mama |

पातारो मे विवर्द्धन्तां बहून्यन्नानि सन्तु मे । याचितारस् सदा सन्तु मा च याचामि कञ्चन ॥

pātāro me vivarddhantāṁ bahūnyannāni santu me |
yācitāras sadā santu mā ca yācāmi kañcana ||

*Give me your blessings, O Merciful Ancestors. May my knowledge, progeny, and kinsmen always increase. May my benefactors prosper. May I have food in profusion. May many always importune of me, and may I not have to importune of any one.*

*Yajamānaḥ* — nāndī-śrāddhaṁ saṁpanna | नान्दी-श्राद्धं संपन्न

*dvijāḥ* — susapannam । सुसपन्नम्

यान्तु पितृ-गणाः सर्वे यतः स्थानाद् उपगताः । सर्वे ते हृष्ट मनसः सर्वान् कामान् ददन्तु मे ॥

yāntu pitṛ-gaṇāḥ sarve yataḥ sthānād upagatāḥ |
sarve te hṛṣṭa manasaḥ sarvān kāmān dadantu me ||

*yajamānaḥ* — अस्मिन् नान्दी-श्राद्धे न्यूनातिरिक्तो यो विधिः स उपविष्ट ब्राह्मणानां वचनान् नान्दीमुख प्रसादात् च सर्वः परिपूर्णोऽस्तु । asmin nāndī-śrāddhe nyūnātirikto yo vidhiḥ sa upaviṣṭa brāhmaṇānāṁ vacanān nāndīmukha prasādāt ca sarvaḥ paripūrṇo'stu |

*May the ritual procedure that has been performed in this Nandi-Shraddha be complete and fulfilled by the grace and blessings of the Brahmins present here. May everyone be fully satisfied and blessed with the grace of Nandi-mukha and the Divine*

*dvijāḥ* — अस्तु परिपूर्णः astu paripūrṇaḥ

*yajamāna (with water in his hand)* — अनेन कृत नान्दी श्राद्धेन नान्दीमुखाः पितरः कर्माङ्ग देवताः प्रजापतिश्च प्रीयताम् ।

anena kṛta nāndī śrāddhena nāndīmukhāḥ pitaraḥ karmāṅga devatāḥ prajāpatiśca prīyatām |

प्रमादात् कुर्वतं कर्म प्रच्यवेताध्वरेषु यत् । स्मरणाद् एव तद् विष्णोस्सम्पूर्णं स्याद् इति श्रुतिः ॥

pramādāt kurvataṁ karma pracyavetādhvareṣu yat |
smaraṇād eva tad viṣṇos sampūrṇaṁ syād iti śrutiḥ ||

यस्य स्मृत्या च नामोक्त्या तपो यज्ञ क्रियादिषु । न्यूनं सम्पूर्णतां याति सद्यो वन्दे तम् अच्युतम् ॥

yasya smṛtyā ca nāmoktyā tapo yajña kriyādiṣu |
nyūnaṁ sampūrṇatāṁ yāti sadyo vande tam acyutam ||

मया हिरण्येन कृतं अभ्युदयिकं संपन्नम् । [सुसंपन्नम्] ॥

mayā hiraṇyena kṛtaṁ abhyudayikaṁ saṁpannam | [susaṁpannam] ||

*May this memorial rite to my ancestors done through these offerings be acceptable.*

आशिर्वादः । तदङ्ग पुण्याहं वाचयेत् ॥

āśirvādaḥ | tadaṅga puṇyāhaṁ vācayet ||

# HIRANYA ŚRĀDDHA SAṄKṢIPTAM
[*Abbreviated*]

- ❖ Prepare 2 trays with the afore mentioned ingredients.
- ❖ Sit facing east and do ācamanam then recite:—

एको विष्णुः महद् भूतं पृथक् भूतान्यनेकशः । त्रीन् लोकान् व्याप्य भूतात्मा भुङ्क्ते विश्वभुगव्ययः ॥
eko viṣṇuḥ mahad bhūtaṁ pṛthak bhūtānyanekaśaḥ ।
trīn lokān vyāpya bhūtātmā bhuṅkte viśvabhug avyayaḥ ॥

नमो ब्रह्मण्य देवाय गो-ब्राह्मण हिताय च । जगधिताय कृष्णाय गोविन्दाय नमो नमः ॥
namo brahmaṇya devāya go-brāhmaṇa hitāya ca ।
jagadhitāya kṛṣṇāya govindāya namo namaḥ ॥

नमो नमस्ते गोविन्द पुराण पुरुषोत्तम । इदं श्राद्धं हृषीकेश रक्ष त्वं सर्वदा ॥
namo namaste govinda purāṇa puruṣottama ।
idaṁ śrāddhaṁ hṛṣīkeśa rakṣa tvaṁ sarvadā ॥

अपवित्रः पवित्रो वा सर्वावस्थं-गतोपि वा । यस्-स्मरेत् पुण्डरिकाक्षं स बाह्याभ्यन्तरः शुचिः ॥
apavitraḥ pavitro vā sarvāvasthaṁ-gatopi vā ।
yas-smaret puṇḍarikākṣaṁ sa bāhyābhyantaraḥ śuciḥ ॥

**Saṅkalpaḥ** — मम उपात + प्रीत्यर्थं वर्ग द्वय पितृणाम् अक्षय तृत्यर्थं नान्दी श्राद्ध हिरण्य-रूपेण अद्य करिष्ये ॥ अप उपस्पृश्य ॥
mama upāta + prītyarthaṁ varga dvaya pitṛṇām akṣaya tṛtyarthaṁ nāndī śrāddha hiraṇya-rūpeṇa adya kariṣye ॥ apa upaspṛśya ॥

- ❖ Sprinkle everything with water.

अस्मिन् नान्दी श्राद्धे सत्यवसु संज्ञकानां विश्वेषां देवानां, प्रपितामही पितामही मातृणां, प्रपितामह पितामह पितृणां, सपत्नीक मातुः प्रपितामह मातुः पितामह मातामहानां, नान्दीमुखानां आवाहयामि, स्थापयमि ॥
asmin nāndī śrāddhe satyavasu saṁjñakānāṁ viśveṣāṁ devānāṁ, prapitāmahī pitāmahī mātṛṇāṁ, prapitāmaha pitāmaha pitṛṇāṁ, sapatnīka mātuḥ prapitāmaha mātuḥ pitāmaha mātāmahānāṁ, nāndīmukhānāṁ āvāhayāmi, sthāpayami ॥

## Upacārāḥ

- ❖ Offer upacāras as before.

**Fathers** — सदेवाः नान्दीमुखाः पितरः अमी वो गन्धाः । इमानि पुष्पाणि । तुलसि दलानि च । सकलारधनैः स्वर्चितम् ॥
sadevāḥ nāndīmukhāḥ pitaraḥ amī vo gandhāḥ । imāni puṣpāṇi । tulasi dalāni ca । sakalāradhanais svarcitam ॥

*O Holy Gods and beatific forefathers, please accept this sandal paste and these flowers, I offer you all respects.*

**Mothers —** सदेवाः नान्दीमुखाः मातरः अमी वो गन्धाः । इमानि पुष्पाणि तुलसि दलानि च । सकलारधनैः स्वर्चितम् ॥
sadevāḥ nāndīmukhāḥ mātaraḥ amī vo gandhāḥ | imāni puṣpāṇi tulasi dalāni ca | sakalāradhanais svarcitam ||

*O Holy Gods and beatific fore-mothers, please accept this sandal paste and these flowers, I offer you all respects.*

अस्मिन् नान्दी श्राद्धे सत्य वसु संज्ञकानां विश्वेषां देवानां प्रपितामही पितामही मातृणां प्रपितामह पितामह पितृणां सपत्नीक मातुः प्रपितामह मातुः पितामह मातामहानां नान्दी मुखानां तृप्त्यर्थं इदं हिरण्यं [आमम्] सदक्षिणाकं सतांबूलं सोपकरणं पूर्व पूजित ब्राह्मणाय संप्रददे नमः । न मम ॥

asmin nāndī śrāddhe satya vasu saṁjñakānāṁ viśveṣāṁ devānāṁ prapitāmahī pitāmahī mātṛṇāṁ prapitāmaha pitāmaha pitṛṇāṁ sapatnīka mātuḥ prapitāmaha mātuḥ pitāmaha mātāmahānāṁ nāndī mukhānāṁ tṛptyarthaṁ idaṁ hiraṇyaṁ [āmam] sadakṣiṇākaṁ satāṁbūlaṁ sopakaraṇaṁ pūrva pūjita brāhmaṇāya saṁpradade namaḥ | na mama ||

हिरण्य गर्भ गर्भस्थं हेम बीज विभावसोः । अनन्त पुण्य फलदम् अथ शान्तिं प्रयच्छ मे ॥
hiraṇya garbha garbhasthaṁ hema bīja vibhāvasoḥ |
ananta puṇya phaladam atha śāntiṁ prayaccha me ||
मया हिरण्येन कृतं अभ्युदयिकं संपन्नम् । [सुसंपन्नम्] ॥
mayā hiraṇyena kṛtaṁ abhyudayikaṁ saṁpannam | [susaṁpannam] ||

## Viśva-kalyāna Prārthana

